# shrI HanumadashtottarashatanAma stotram 9

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રનામાવલિઃ ૯

## Document Information

Text title : Hanumat Ashtottarashatanama Stotram 9

File name : hanumadaShTottarashatanAmastotram9.itx

Category : hanumaana, aShTottarashatanAma, stotra

Location : doc_hanumaana

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, PSA Easwaran

Description-comments : See corresponding nAmAvalI.

Source : ParAsharasamhita Hanumachcharitra Vol 2 pages 130-132

Latest update : September 30, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2024

*sanskritdocuments.org*

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રનામાવલિઃ ૯

શ્રીપરાશર ઉવાચ ।
અન્યસ્તોત્રં પ્રવક્ષ્યામિ રામપ્રોક્તં મહામુને ।
અષ્ટોત્તરશતં નામ્નાં હનુમત્પ્રતિપાદકમ્ ॥

ૐ અસ્ય શ્રીહનુમદષ્ટોત્તરશતદિવ્યનામસ્તોત્રમન્ત્રસ્ય
શ્રીરામચન્દ્ર ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીહનુમાન્ દેવતા । મારુતાત્મજ ઇતિ બીજમ્ ।
અઞ્જનાસૂનુરિતિ શક્તિઃ । વાયુપુત્રેતિ કીલકમ્ ।
મમ શ્રીહનુમત્પ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

નમસ્તસ્મૈ હનુમતે યેન તીર્ણો મહાર્ણવઃ ।
રામલક્ષ્મણસીતાપ્યુત્તીર્ણશોકમહાર્ણવઃ ॥

સપ્તષષ્ટિર્હિતાં કોટિ વાનરાણાં તરસ્વિનામ્ ।
યસ્સમુજ્જીવયામાસ તં વન્દે મારુતાત્મજમ્ ॥

યો દક્ષિણાં દિશં ગત્વા વૈદેહીં રામમુદ્રયા ।
અજીવયત્તમમૃતં પ્રપદ્યે પવનાત્મજમ્ ॥

ઇતિહાસપુરાણેષુ પ્રકીર્ણાનામિતસ્તતઃ ।
શતમષ્ટોત્તરં નામ્નાં સઙ્ગ્રહિષ્યે હનૂમતઃ ॥

શ્રીરામચન્દ્ર ઉવાચ ।
ૐ આયુષ્મતે । અપ્રમેયાત્મને । હનુમતે નમઃ ।
મારુતાત્મજાય ઽઞ્જનાતનયાય શ્રીમતે ।
બાલાર્કફલભુક્ધિયે । સૂર્યપૃષ્ઠગમનાય પુણ્યાય ।
સર્વશાસ્ત્રાર્થતત્ત્વવિદે । બહુશ્રુતવ્યાકરણાય ।
રામસુગ્રીવસખ્યકૃતે । રામદાસાય । રામદૂતાય ।
રામાત્મને । રામદૈવતાય । રામભક્તાય ।

રામસખાય । રામનિધયે । રામહર્ષણાય ।
મહાનુભાવાય । મેધાવિને ।
મહેન્દ્રગિરિમર્દનાય । મૈનાકમાનિતાય ।
માન્યાય । મહોત્સાહાય । મહાબલાય ।
દેવમાતાહૃન્નિવહાય । ગોષ્પદીકૃતવારિધયે ।
લઙ્કાદ્વીપવિચિત્રાઙ્ગાય । સીતાન્વેષણકોવિદાય ।
સીતાદર્શનસન્તુષ્ટાય । રામપત્નીપ્રિયંવદાય ।
દશકણ્ઠશિરશ્છેત્રે । સ્તુતતાર્ક્ષ્યાય ।
અભિદર્શનાય । ધીરાય । કાઞ્ચનવર્ણાઙ્ગાય ।
તરુણાર્કનિભાય । દીપ્તાનલાર્ચિષે । દ્યુતિમતે ।
વજ્રદંષ્ટ્રાય । નખાયુધાય । મેરુમન્દરસઙ્કાશાય ।
વિદ્રુમપ્રતિમાનનાય । સમર્થાય । વિશ્રાન્તાય ।
દુર્ધર્ષાય । શત્રુકમ્પનાય । અશોકવનિકાચ્છેત્રે !
વીરકિઙ્કરસૂદનાય । ચૈત્યપ્રાસાદવિધ્વંસિને ।
જમ્બુમાલીનિષૂદનાય । સીતાપ્રસાદકાય ।
શૌરયે વસ્ત્રલાઙ્ગૂલપાવકાય । દગ્ધલઙ્કાય ।
અપ્રમેયાત્મને repeated 2 । મહાજીમૂતનિસ્વનાય ।
સંસ્કારસમ્પન્નવચસે । વિભીષણવિશોકકૃતે ।
મુષ્ટિપિષ્ટદશાસ્યાઙ્ગાય । લક્ષ્મણોદ્વાહનપ્રિયાય ।
ધૂમ્રાક્ષઘ્ને । અકમ્પનઘ્ને । ત્રિશિરઘ્ને । નિકુમ્ભઘ્ને ।
પાપરાક્ષસસઙ્ઘઘ્નાય । પાપનાશનકીર્તનાય ।
મૃતસઞ્જીવનાય । યોગિને । વિષ્ણુચક્રપરાક્રમાય ।
હસ્તન્યસ્તૌષધિગિરયે । ચતુર્વર્ગફલપ્રદાય ।
લક્ષ્મણોજ્જીવનાય । શ્લાધ્યાય । લક્ષ્મણાર્થહૃતૌષધયે ।
દશગ્રીવવધોદ્યોગિને । સીતાનુગ્રહભાજનાય ।
રામં પ્રત્યાગતાય । દિવ્યાય । વૈદેહીદત્તભૂષણાય ।
રામાદ્ભુતયશસ્તમ્ભાય । યાવદ્રામકથાસ્થિતાય ।
નિષ્કલ્મષાય । બ્રહ્મચારિણે । વિદ્યુત્સઙ્ઘાતપિઙ્ગલાય ।
કદલીવનમધ્યસ્થાય । મહાલક્ષ્મીસમાશ્રયાય ।
ભીમનિષ્કમ્પનાય । ભીમાય । અવ્યગ્રાય ।
ભીમસેનાગ્રજાય । યુગાય । ધનઞ્જયરથારૂઢાય ।
શિવભક્તાય । શિવપ્રિયાય । ચૂર્ણીકૃતાક્ષદેહાય ।

જ્વલિતાગ્નિનિભાનનાય । પિઙ્ગાક્ષાય ।
વિભવે આક્લાન્તાય । લઙ્કિણીપ્રાણઘાતકાય ।
પુચ્છાગ્નિદગ્ધલઙ્કાય । માલ્યવત્પ્રાણહારિણે ।
શ્રીપ્રદાય । અનિલસૂનવે । વાગ્મિને વાનરનાયકાય નમઃ ॥

ઇત્યેવં કીર્તનં યસ્ય નામ્નામષ્ટોત્તરં શતમ્ ।
પુણ્યં પવનપુત્રસ્ય પાવનં પરિકીર્તનમ્ ॥
કીર્તયન્ શ્રાવયન્ શ‍ૃણ્વન્ આયુષ્મત્તામરોગતામ્ ।
વિષ્ણુભક્તિં શ્રિયં દીપ્તિં પ્રાપ્નોત્યેવ પરાયણઃ ॥
મહાભયેષુ યુદ્ધેષુ ચોરવ્યાલમૃગેષુ ચ ।
જપતાં કુરુતે નિત્યં ભગવાન્ પવનાત્મજઃ ॥

॥ ઇતિ શ્રીરામપ્રોક્તં શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રનામાવલિઃ સમ્પૂર્ણા ॥

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay, PSA Easwaran

*shrI HanumadashtottarashatanAma stotram 9*
pdf was typeset on August 24, 2024

Please send corrections to *sanskrit@cheerful.com*